THE KASHMIR SERIES
OF
TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS AND STUDIES.
No. LXVII.

THE GHAṬAKARPARA KĀVYA OF KALIDĀSA

With the Commentary of
ABHINAVAGUPTA

EDITED BY
PANDIT MADHUSUDAN KAUL SHASTRI,
SUPERINTENDENT RESEARCH DEPARTMENT
HIS HIGHNESS' GOVERNMENT,
JAMMU & KASHMIR,
SRINAGAR.

Published under the authority of the Government of
His Highness Rājarājesvara Mahārājādhirāja
Sri MAHĀRĀJĀ HARISINGHJI BAHĀDUR,
G.C.S.I., G.C.I.E., K.C.V.O., LL.D.
MAHĀRĀJĀ OF JAMMU & KASHMIR.



SRINAGAR.
Printed at the Mercantile Press
1945 A.D.



कश्मीरसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६७

महाकविकालिदासकृतं

घटकर्परकाव्यं

श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपाद-

रचितविवृत्युपेतम् ।

श्रीराजराजेश्वर-महाराजाधिराज-कश्मीरनरेन्द्र-

श्रीहरिसिंहजी-बहादुराज्ञया

रिसर्चकार्यालयाध्यक्ष-पण्डितमधुसूदनकौलशास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संशोधनादिसंस्करणोत्तरं

संपाद्य

श्रीनगरे 'मर्कण्टाइल' मुद्रणालये मुद्रापयित्वा

प्राकाश्यमुपनीतम् ।



संवत् २००२ कश्मीर-श्रीनगर खैस्ताब्दः १९४५

(अस्य ग्रन्थस्य मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः

स्वायत्तीकृताः सन्ति)

(*All rights reserved*)

Published by
Paṇdit Madhusudan Kaul Shastri,
for the Research Department,
Jammu & Kashmir Government,
Srinagar.

GHAṬAKARPARA KAVYA.

INTRODUCTION.

The poem which is presented in the following pages is called Ghaṭakarpara and consists of twentyone stanzas in all. It is called Ghaṭakarpara because in the concluding stanza the word Ghaṭakarpara is used by the author who takes a vow that he would voluntarily accept the service, even so mean as that of bearing water in a broken pot, of him who defeats him in the art of writing alliterative verses.

The author of the poem according to Abhinavagupta whose commentary accompanies the text in the present edition, is the famous poet of India, namely, Kālidāsa.

In the Bombay edition of the Ghaṭakarpara the number exceeds by one stanza, although strictly speaking even the twentieth stanza is an interpolation on the authority of Abhinavagupta. The present edition differs also from the Bombay edition in the matter of the arrangement of the stanzas. The former begins with the stanza छादिते etc. and the latter with निचितं etc.

The poem describes the sad plight of a young lady whose husband is away from her during the rainy season. The stanzas 2,3,4,5,8,9,10,11,12,13 and 14 are put in the mouth of the young lady and the 6th and the 7th in the mouth of the female messenger from the husband. In the last two stanzas there appears the poet himself as a speaker.

The author of the Vivriti or the commentary is Abhinavagupta as is mentioned above. He refers to his famous teacher in the poetics, Indurāja.

In the exposition of the text Abhinava has tried his best as an advocate of the Dhvani School of the Rhetoricians to lay stress more on the implied sense than on the denotation of the words.

The edition in question forms the 67th issue of the Kashmir Series of Texts and Studies, and is based on the transcript, prepared by the copying branch of the Research Department, from the Manuscript of the Raghunātha Temple Library, Jammu, which is detailed below : —

Manuscript No:	Title of the Manuscript.	Author's name	Leaves	Lines	Letters
809	Ghatakarpara-vivriti.	Abhinavagupta	10	13	46

———:o:———

महाकविकालिदासकृतं

घटकर्परकाव्यं

श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादरचित-
विवृत्युपेतम् ।

अपूर्वः कोऽयं ते वरद शिरसः शेखरविधि-
र्ननु ज्ञातं प्लुष्टं स्मरधनुरिदं मूर्धनि धृतम् ।
यदालोकाल्लोके विषमविशिखः स्फूर्जतितरा-
मिति प्रोक्ते देव्या गलितनियमः शम्भुरवतात् ॥

इदं प्रोषितप्रमदया हेतुभूतया प्रोषितप्रमदामुद्दिश्य कथ्यते कुलकम् । तत्र किञ्चित् कविनिबद्धप्रमदावक्तृकम्, किञ्चित् कविनिबद्धतत्सखीभाषितम्, किञ्चित् कविनिबद्धदूतीभाषितम्, अन्यत् कविप्रकटितप्रतिदूतीवचनम्, इतरत् स्वतन्त्रकविकथितम्,-इति बहुप्रकारं दर्शयिष्यामः; नतु सैव एका कथनकर्त्री । प्रोषितः प्रमदो वल्लभो हर्षश्च यस्याः; अथच प्रोषिता वल्लभेन वियुक्ता, प्रकृष्टेन यौवनेन शृङ्गारजनितेन मदेन च युक्ता । अन्यदेशतया वियुक्तत्वमेव प्रोषितत्वेन लक्ष्यते

छादिते दिनकरस्य भावने
खाञ्जले पतति शोकभावने ।
मन्मथे च हृदि हन्तुमुद्यते
प्रोषितप्रमदयेदमुद्यते ॥ १ ॥

दिनं करोतीति दिनकरस्तस्य भावने रश्मिपुञ्जे छादिते तिरस्कृते सति तासां तमःप्रतिपक्षतया सुप्रसिद्धानामपि न न सति तन्मनाः ? स सूर्यो यत्र आच्छाद्यते तत्र कथं हर्षालोकोऽपि मानसोऽस्तु, अथच विरहिणीनां रजनिसमयजनितरणरणककलुषितहृदयानां कदाचित् दिनमपि विविधविनोदनालोकवितरणेन बन्धुतां यायात् ; अद्यतु यत्प्रसादात् तादृशदिनमुपजायते तस्य अपि कश्चिदात्मीयः सहजः स्वभावः, सोऽपि आच्छादित इति सातिशयं भाग्यहीनत्वं द्योतितम् । तथा जले च आकाशात् पतति । कीदृशि । शोकं भावयति । जलं हि निकटवर्तिना पार्थिवरजसा पार्थिववरजन्तोरात्मानं भावयति एकतया योजयतीति श्रुतमिदम्, अद्य तु अपूर्वं वर्तते शोकेन विरहिणीर्भावयति शोकमय्य एव सम्पाद्यन्ते ताः । नहि तासां प्रावृट्समयमध्ये प्रियागमनशङ्कामात्रमपि अस्तीति तावत्कालं नैराश्यमेव । खात् पततीत्यनेन अमुष्य दुष्प्रसहस्य अप्रतीकारतया सातिशयोऽनुतापः सूच्यते । तथा मन्मथो हृदयप्रहरणं प्रति ससंरम्भः । अथच बाह्यो यः कश्चित् हन्ता तस्मादुपायैः पलाय्यतेऽपि, अयं पुनर्हृदयावस्थित एव अन्तर्हननं प्रति ससंरम्भः । चशब्द एककालतासूचकः । यथा कश्चित् दुर्जनो निर्जने निरालोके दुर्दिन एव सशोकं जनमत एव निरुध्यमानमेकाकिनं प्राप्यैव लब्धच्छिद्रो प्रहरति, तथैव अमुष्मिन् काल ईदृशमिव कामिनीजनं मदनस्ताडयतीत्यर्थः ॥ १ ॥

सर्वकालमतिवाह्य तोयदा
आगताः स्थ दयितो गतो यदा ।

निर्दयेन परदेशसेविना
मारयिष्यथ हि तेन मां विना ॥ २ ॥

इयं नायिकाया एव उक्तिः । हे तोयदाः ! मच्छोकभावकजलवितरणोद्यता यत्र वयं प्रियवियुक्ता न अभूम, तादृशं कालमतिवाह्य यत्र क्वचित् यापयित्वा यदा अद्य दयितो गतस्तदा यूयमागताः; तथा सर्वं कालं दिष्टमथच कृतान्तरूपं येषां ते तथा मतिबाह्या अमनोज्ञमनसः पीडकत्वात् ते च तोयदाश्चेति विग्रहः । अतश्च मां मारयिष्यथ, काका उक्तिः । एवं नाम पुण्यभागिनी भूयासं, येन दयितजनविरहिता भीषणभवदीयचरितावलोकनपरिखिन्नहृदया जीवितत्यागेन अपि सुखमासीना; अथच दयितेन विना या जीवति सा अवश्यवधार्हैव । यश्च निर्दयः सन् परदेशं सेवते, स चेत् दयिताया हृदयं प्रविष्टः, तत्करतलोपनतमेव मरणम् । नहि असौ जलधरसमये किमपि कार्यं कर्तुं समर्थ इति अवश्यमेक एव क्वचन चिरमास्ते इति । तस्मादस्मासु उपरि प्रेम तावदास्ताम् ; दयामपि यदि अकरिष्यत्, तदवश्यमिहैव आगमिष्यदित्येतावती कष्टपरम्परेति अनेन विश्वासपरिपाटीजनितदौःस्थित्यसूचकेन ध्वन्यते ॥ २ ॥

प्रियतमं प्रति निजावस्थां जिज्ञापयिषुर्भीषणजलदविजृम्भामसहिष्णुर्युक्त्या कथंचिद्वचनात् यदि अमी देशान्तरं व्रजेयुस्तत् सर्वं संपत्स्यते । प्रियतमोऽपि च तद्देशप्राप्तजलधरध्वानाकर्णनेन कदाचित् मदीयामवस्थां स्वयं वा अनुभवेदपि,-इत्यभिप्रायेण नायिका इदमाह

ब्रूत तं पथिकपांसुलं घना
यूयमेव पथिशीघ्रलङ्घनाः ।
अन्यदेशरतिरद्य मुच्यतां
साथवा तव वधूः किमुच्यताम् ॥३॥

हे घनाः ! मेघाः, अथच अतिनिविडाः, अत एव हननशीलाः, तं पथिकानां मध्ये पांसुलं निर्मर्यादं निर्दयं ब्रूत । एतदेव तस्य अभिज्ञानं यत् पथिकेषु मध्ये स एव निर्दय इत्यर्थः । यतो यूयमेव पथः शीघ्रं लङ्घयथेत्यनेन कथमितः क्षिप्रमेव व्रजेयुरिति प्रोत्साहना ध्वन्यते । ब्रूतेति च अध्येषणा इयम्, लङ्घनं च चिरव्रजितस्य अपि झगिति आसादनम् । प्रियतमो हि चिरकालं प्रोषितः, स कथं यो मार्गं लङ्घयितुं न शक्तस्तेन अद्य इतश्चलितेन लभ्येतेति भावः । किं ब्रूत । अन्यस्मिन् देशे या इयं रतिर्विना अपि कार्यमासक्तिः, अथच वल्लभान्तरेण सह प्रेमविस्रम्भो नहि अन्यथा अम्बुधरकालोऽतिवाह्य इति, सा रतिर्मुच्यताम् । अवश्यं हि तया रत्या भवान् ग्रथित एवेति उपालम्भगर्भा उक्तिः । अद्येति अद्यैवेत्यर्थः । अथ कथं प्रेम सविस्रम्भं शिथिलयितुं शक्तस्तर्हि सा तव वधूर्न पुनः प्रियतमा, अपितु शास्त्रसमयपत्नी । किं कथ्यतां. न वयमप्रियमावेदयामः, निश्चितं तु प्राणान् नैव धारयेत् । अथवा साथवा तव वधूरित्येतावत् सन्देशवचनमभिधाय किमहं कथं वा भवेयमिति किमलीकविकत्थनेनेति अवश्यमेव न जीवामीत्यर्थः ॥ ३ ॥

हंसपङ्क्तिरपि नाथ संप्रति
प्रस्थिता वियति मानसं प्रति ।
चातकश्च तृषितोऽम्बु याचते
दुःखिता पथिक सा प्रिया च ते ॥ ४ ॥

यदि पुनरद्य मार्गे गमनमागमनं च न युज्यते इति शङ्क्यते, तदेवं ब्रूतेति नायिका आह- हे पथिक ! नहि भवान् नित्यं पथा गच्छति, अतो यदा तद्देशगतोऽभूत् तदा सा प्रिया श्रूयते स्म । अतश्चातकस्तृषाक्रान्तो जलं याचते, सा च तव याच्ञां करोति । अनेन चातकया-च्ञां प्रति जलस्य कारकता । त्वं तु तदीययाच्ञां प्रति न कारकः । स हि याच्ञां प्रति कारको भवति, यः कदाचिदाशापूरणं करोति । त्वं तु सर्वकालमेवंविधप्रति-कूलाचरणचञ्चुरेव । तथापि तु याच्यसे । अत एव आह न प्रभुः पर्यनुयोगार्हः । हंसानां सम्बन्धिनी पङ्क्तिर-तिबहवोऽपि हंसा अद्य आकाशमार्गे मानसं प्रति प्रच-लिताः । एकोऽपि हि यत्र गच्छति, तत्र अवश्यमपरस्य अपि अनिरुद्धेन पथा भाव्यं; किं पुनर्बहवः । यतश्च ज-लधरमुक्तजलपटले ता वियतो भुवि सञ्चरन्ति तस्य यदेकायतनमाकाशं तदेव हंसानां मार्गत्वेन वर्तते । भूमौ मार्गे को भयसम्भवः । यत्र च अतिदूरं मानसं गन्तुं निर्बुद्धीनामपि हंसानामुद्यमः, तत्र परिमितदेशनिवृत्तिमात्र एव न किमिति सा प्रिया भवतो याचते ॥ ४ ॥

नीलशष्पमभिभाति कोमलं
वारि विन्दति च चातकोऽमलम् ।

अम्बुदैः शिखिगणो विनाद्यते
का रतिः प्रिय मया विनाद्य ते ॥ ५ ॥

नीलं शष्पाख्यं तृणं सर्वतो भाति, चातको निर्मलं जलं विन्दति जलं लभते, मयूरकुलं च मेघैः केकायुक्तं क्रियते,-इत्येतैर्वाक्यैः प्रत्युत इह आगच्छतस्तव किमपि पथि मनोहरत्वमिति ध्वन्यते । नीलं च शष्पमवलोक्य तत्तत्सुकुमारतरस्पर्शानुभवसुखितचरणयुगलस्य गगननिपतितामलजलदलितङ्कमस्य मुदितमयूररचितकेकाकरणनिर्भरविकस्वरकर्णद्वयस्य अवश्यं सर्वमेव सुखम् । अद्य तु तूष्णीं स्थितस्य मया विना का रतिः, न काचिदिति स्वात्मसौभाग्यसंभावनागर्भा इयमुक्तिः । अथच मम ईदृशी अवस्था यतो वर्तते, ततो मां प्रति शष्पं नीलं मलिनस्वभावमपि कोमलं करुणार्द्रमिव भाति । चातकश्च यो नाम्नैव प्रियगगनजलः प्रसिद्धः, सोऽपि जलमिह लभते, न तथा पिबतीति प्रतीयमाना उत्प्रेक्षा । अम्बुदैश्च विरहिहृदयस्फोटनपटुतरगर्जितैरपि ममोपरि करुणावशात् निजसुहृत्कुलमाक्रन्दवत् सम्पाद्यते । का पुनर्मया विना मम अभावे का अरतिः कः खेदः, न कश्चित् । तथा मम अभावे भवतः का इयं रतिः कोऽयमनुबन्धः, सा म्रियतामिति । अथच प्राङ् मया विना तव रतिर्न कदाचिदभूत, अद्य तु कथं सा रतिः । अद्येत्यनेन प्रागत्यन्तप्रेमरसमानसतां कपटेन किल प्रकटितवानसीति ध्वन्यते । अत एव सोत्प्रासं प्रियेति आमन्त्रणमिति उपालम्भगर्भा भणितिः ॥ ५ ॥

मेघशब्दमुदिताः कलापिनः
प्रोषितार्तहृदयशोकलापिनः ।

तोयदागमकृशा च साद्य ते
दुर्धरेण मदनेन साद्यते ॥६॥

अमी ये भवता पुरः परिदृश्यन्ते कलापिनस्ते मेघानां सेचनप्रधानानां सम्बन्धिना शब्देन मुदिताः केकाप्रियत्वात् , तथाच प्रोषितानां कान्तानां सम्बन्धिनि हृदये शोकं लापयन्ति सम्यक् श्लेषयन्ति अवश्यं, तथा प्रोषितानां हृदये शोकं लपन्ति तेषु हि कूजत्सु अवश्यं विरहिण्यः शोकवत्य इति निश्चीयते, तथा प्रोषिताहृदयं शोकेन लापयन्ति द्रवीकुर्वते । सा च ते प्रिया तावकी प्रिया अथच तव दुर्धरेण कामेन पूर्वं हि कामभयभीतायास्त्वमेव शरणमभूः, अद्य तु इह स्थितस्य तव मदनो दुर्धर इति दुर्निवारः । सम्बन्धमात्रे षष्ठी, ननु कर्तरि 'खलर्थ०' (२।३।६६) इति प्रतिषेधात् । तथा तवैव सन्निहितस्य सा तोयदागमे कृशा अभूत् । आगमिष्यति जलधरसमयः प्रवत्स्यति च प्रियतमः इति रणरणकवती भवत्सन्निधाने कृशा बभूव । अद्य तत्र मध्ये भूयान् कालो गत इति अस्या अद्य हितेन भवितव्यमिति कविनिबद्धदूतीवचनमिदम् । नहि मेघानां स्वयमेव 'मेघशब्दमुदिताः' इति 'तोयदागम०' इति च स्वातन्त्र्येण कथयितुमुचितम् । 'अम्बुदैः शिखिगणो विनाद्यते' इत्यत्र तु प्राक्तनश्लोके मेघमुखसञ्चारिताद्वारा नायिका एव कविना वक्तृत्वेन उपनिबद्धा, इह तु नैवम् ॥ ६ ॥

किं क्षमापि तव नास्ति कान्तया
पाण्डुगण्डपतितालकान्तया ।

शोकसागरजले च पातितां
त्वद्गुणस्मरणमेव पाति ताम् ॥ ७ ॥

सख्या एव दूतीत्वेन प्रेषिताया इयं भणितिः । आस्तां तावत् प्रेमानुबन्धः । तादृशी अपि या कान्ता लावण्याद्यसाधारणभूता, सा यदि ईदृशवत् जायते, तत् किं तया हेतुभूतया क्षमा अपि नास्ति । पाण्डुरच्छाययोः कपोलयोः पतिता अलकान्ता यस्याः, तदीयकपोलतलपाण्डिमानं मलिनस्वभावा अलका अपि प्रक्षितुं न पारयन्तीत्यर्थः । अथच कान्तेति आमन्त्रणमपि । त्वं यदि तस्या वल्लभस्तथा ईदृश्या जनमात्रकृपाभाजनभूतया अपि या सामान्यजनस्य कृपा भवति, सापि न अस्ति तव आत्मनि इयतापि पुरुषगुणं बहुमानं वहतोऽपि । तथापि सा शोकार्णवपानीये मेघसमयवारिणा पातिता भवदीयगुणस्मरणेन एव रक्ष्यते । अथच त्वत्तस्तव सकाशात् पतिता शोके, भवद्विप्रयुक्ता च जाता, शोकजलधौ च निमग्ना सम्पन्नेत्यर्थः । चकारादेतत् ध्वन्यते, वस्तुतस्तु त्वद्गुणानामेव सातिशयसम्भोगादीनां स्मरणेन एव शोके पतिता । अद्यतु तथा कृपापात्रतां प्राप्ता, यदुत तेन निष्करुणेन पातिता अपि त्वद्गुणस्मरणेन एव रक्ष्यते । मम किल स प्रियतमोऽपगतो निर्बहुमानो मां प्रति च दृढतरप्रेमपवित्रितान्तःकरणो नूनं मामेव तदवस्थां यथा पूर्वं त्रातवांस्त्वां तथा त्रास्यते इति त्वद्गुणानां स्मरन्ती सा जीवतीति यावत् । तथा योऽयं सागरे पतितः, सोऽपि अवश्यं गुणस्मरणवृत्त्या एव रक्ष्यते दृढगुणविरचितरज्ज्ववलम्बनेन जातुचिदुत्तरेयमपि,—इत्यर्थः ॥ ७ ॥

कुसुमितकुटजेषु काननेषु
प्रियरहितेषु समुत्सुकाननेषु ।
द्रवति च कलुषं जलं नदीनां
किमिति च मां समवेक्षसे न दीनाम् ॥८॥

इयं विलापावस्थां यातायाः स्वयमेव नायिकाया उक्तिः । पुष्पितानि कुटजानि येषु वनेषु याः समुत्सुका उत्कण्ठिता मादृश्यस्तासां यानि आननानि प्रियतमवियुक्तानि तेषु तद्विषये नदीनामपि कलुषं जलं गलति अस्मादृशीनां विरहिणीनामाननानि अवलोक्य जडभावानामपि कलुषं जलं गलति, अस्मादृशीनां विरहिणीसरितां शोकाविलं जलं गलतीत्यर्थः । त्वं मां दीनां किमिति समवेक्षसेऽपि न । चकारावपिशब्दार्थौ भिन्नक्रमौ, एको दीनामित्यस्य अनन्तरम्, अपरस्तु समवेक्षसेशब्दस्य ॥८॥

मार्गेषु मेघसलिलेन विनाशितेषु
कामो धनुः स्पृशति तेन विना शितेषु ।
गम्भीरमेघरसितव्यथिता कदाहं
जह्यां सखि प्रियवियोगजशोकदाहम् ॥९॥

विसृष्टायामपि दूत्यां तद्वचनाकर्णनादपि न आगत इति शोकाकुलमनसि नायिकायां यदा कदाचित् सखी तत्समाश्वासनाय इत्थमभिहितवती- मार्गाणां दुःसञ्चरत्वादसौ न प्राप्तः, तदा पुनरपि नायिकायाः सखीं प्रति इयमुक्तिः— सखि! पश्य, मार्गा मेघसलिलेन नाशितास्तथापरोऽयं दोषः- अप्रत्ययेषु मार्गेषु शिता इषवो यत्र तादृक् धनुः स्पृशति, शितं शरं सन्धाय आकर्णाकृष्टं मोक्तुमि-

च्छतीत्यर्थः । तेन विना तद्वियुक्तायाः अथच यदि अहं तमभिसरेयं, तत् मार्गा दुर्ज्ञानाः, तथाविधेषु अपि तेषु दुःसहं स्मरशरभयं स्मरश्च तद्वर्जं शरान् सन्धत्ते मामेव ताडयति, अन्यथा कदाचित् तस्यैव गमनमिह सम्भाव्येत । अथ इहस्था एव जलदसमयमतिवाहयामि , तत् गम्भीरेण घनगर्जितेन जातत्रासा तिष्ठामि । अतो हे सखि ! कदा अहं प्रियवियोगजं शोकदाहं जह्याम् । अहं च मेघशब्दव्यथिता, मदनश्च निशितशरपातनोद्यत इति अवश्यं मम जीवितान्तेन भाव्यम् । तच्च कदा भवेत्, यत्र अहं सकलशोकनिर्मुक्ता सम्पद्येयेति । केचित् सखीप्रियेति पठन्तः सहृदयाः कथमद्य अपि सखी दूतीत्वेन विसृष्टा सा अपि न आगता तत् नूनं तत्सम्भोगरसलालसया तया भाव्यमिति सम्भावयन्त्यां नायिकायां कयाचित् वयस्यया मा-गदौरात्म्ये तदागमनविघ्नकारिणि उपन्यस्ते स्वयं नायिकाया इदं सूक्तमिति अभ्यूचुः । मार्गास्तावत् नष्टाः, तेन च विना मदनः प्रहरतीति तन्निकटात् चलितुं न युज्यतेऽस्याः । अथच तत्सम्भोगरसवृत्तिस्मरणेनैव मदनकदर्थनार्हा अतोऽहं साध्या । प्रियेण च सह वियोगः, तथा तस्य साध्या । इदानीं यः प्रियस्तेन सह वियोगः, तज्जं शोकदाहं कदा जीवितान्तेन अपि जह्याम् ॥ ९ ॥

सुसुगन्धितया वने जितानां
स्वनदम्भोधरवातवीजितानाम् ।
मदनस्य कृते निकेतनानां
प्रतिभान्त्यद्य वनानि केतनानाम् ॥ १० ॥

यदा विनोदनार्थं साध्या उद्यानोपवनं नीता, तदा तद्दर्शनद्विगुणतरोपचितविलापावस्थाया नायिकाया इदं सूक्तम् । केतननाम्नां तरूणां वनानि अद्य विराजन्ते । कीदृशानाम् । सुष्ठु सौरभेण वनमध्ये केनचिदजितानां, तथा गर्जतां मेघानां पवनेन वीजितानां प्रबोधितानाम् । अत एव कामस्य कृते निकेतनानां सङ्केतधाम्नाम् । अयमभिप्रायः — केतनवनानि मदननिवेशनस्थानानीति अतिसुकुमाराणि , जलधररसिततद्विमुक्तशीकरासारसहितश्च पवनस्तेषामेव प्रबोधनहेतुतया सुकुमारतामाप्त इति किमत्र जलदसमये मार्गवैषम्यम , तत् नूनमेव केतनवनावलोकनप्रबोधितमदनस्थानसुखसंस्कारः प्रियतम आगमिष्यतीति सम्भावयन्त्या नायिकाया भणितिः प्रतिभातीति । अपरे तु वनशब्दपौनरुक्त्यमसृष्यमाणा मदनस्य अवने रक्षणे कृते अजितानां केतनानां वनानि शोभन्ते इति आहुः । अथवा सौरभेण ये वने एकान्ते यत्र अपरः परित्राता न सम्भाव्यते तत्र जिता अपहृतधैर्यवृत्तयः कृता विमोहिताः केचन विरहिजनाः, तेषां दैववशात् जलधरशिशिरपवनप्रबोधितानामपि पुनरपि एतानि केतनवनानि कामस्य कृते करणाय प्रतिभान्ति । मदनातङ्ककरणाद्दते न एतेषां किमपि प्रयोजनमिति यावत् । स्वनशब्देन करुणावशात् शब्दायमानता ध्वन्यते । यदा स्वनन्तो गर्जन्तोऽम्भोधरा यत्र संजातकृपाः संवृत्ताः, तत्र अमीषां केतनवनानां का इयं निष्करुणता ॥ १० ॥

तत्साधु यच्चां सुतरुं ससर्ज
प्रजापतिः कामनिवास सर्ज ।

त्वं मञ्जरीभिः प्रवरो वनानां
नेत्रोत्सवश्चासि सयौवनानाम् ॥ ११ ॥

इयमनन्तरवदेव उक्तिः । हे सर्जनामधेय ! प्रजापतिर्यत् त्वां ससर्ज शोभनं तरुं, तत् साधु, यतस्त्वं कामस्य निवासः । काकुरियमेवं ध्वनति–प्रजानां किल पत्या अवश्यं प्रजाहितकारिणा भवितव्यम्, एवंविधहृदयदाहवितरणनिःशेषितनिखिलजन्तोः कामस्य निवासभूतं भवन्तं निर्मिमाणेन प्रजापतिना सुष्ठु प्रजापतित्वमुद्दर्शितं, त्वयि दृष्टमात्र एव मम कापि व्यथा विजृम्भते इत्यर्थः । अथ एवमपि जानती किमिति मामवलोकितवत्यसीति यदि, तत् किल मञ्जरीभिर्भवान् सकलवनमध्ये श्रेष्ठो बर्हीभिः कान्ताभिस्तु परिवृत इति शृङ्गारिणि भवति बहुमान इत्यर्थः, तथापि सयौवनानां युवतीनां तु नेत्रोत्सवः । यदा किल अहं युवतिः प्रियसंयुक्ता त्वामवलोकितवती, तदा लोकोत्तरनयनानन्दवती अभूवम्, अद्य त्वमेवंविधबहुतरवल्लभापरिवृतो भूत्वा कथं मां प्रियवियुक्तां त्रातव्यां दर्शनमात्रेण अपि मदनपरवशां करोषीति वाक्यार्थः ॥ ११ ॥

नवकदम्ब शिरोऽवनतास्मि ते
वसति वो मदनः कुसुमस्मिते ।
कुटज किं कुसुमैरवहस्यते
प्रणिपतामि च दुष्प्रसहस्य ते ॥ १२ ॥

यदा सर्जतरोरपक्रान्ता नायिका झगिति कदम्बमवलोकयति, तदा प्राक्तनमदनभयभीतिमती झगिति आह—

हे नवकदम्ब! इदानीमेव अवलोकितानुभूतत्वदीयप्रतापा अहं तुभ्यं शिरसा अवनता अस्मि । एवं यावत् भणति, तावत् तदीयकुसुमविलोकनजनितरणरणका आह— युष्माकं पुष्पविकासे कामो वसति, मया ज्ञातं सर्जस्यैव इदं वैषम्यं यावता त्वमपि एवमेव, सर्वेषामेकयोगक्षेमतेति सर्वथा मम हताशाया नयनविषयताक्षमं न किञ्चित् समस्तीति व इति बहुवचनेन ध्वन्यते । इत्थमाकारयन्ती एव नायिका यदा कुसुमितं झगिति कुटजमवलोकयति, तदा मन्यते नूनं मामयं सर्वतो हि हतभागधेयामपहसतीति तत आह—हे कुटज! किमिति अवाङ्मुखं कृत्वा हस्यते । कुसुमितोऽपि प्रदेशोऽवश्यं पराभिमुखः; यश्च सन्निहित एव परमपहसति, सोऽपि अवाङ्मुख एव । अतश्च त्वयि उपचीयमाने बहुतरव्यथा । ते दुःसहस्य प्रणाम एव शोभन इति काकुः । अत एव ईप्सिततमत्वाभावः सम्बन्धषष्ठ्या व्यज्यते । किंकुसुमैरिति कुत्सितैः परातङ्कवितरणचतुरैः पुष्पैरवहस्यते इति सोत्प्रासं काका ध्वनितोऽर्थः ॥ १२ ॥

तरुवर विनतास्मि ते सदाहं
हृदयं मे प्रकरोषि किं सदाहम् ।
तव पुष्पनिरीक्षितापदेहं
विसृजेयं सहसैव नीप देहम् ॥ १३ ॥

हे नीपाभिधान तरुश्रेष्ठ! तव सर्वकालमहं प्रणता, तत् किमद्य मम हृदयं दाहयुक्तं प्रकर्षेण करोषि । अन्येऽपि तरवो न एवं मां दहन्ति यथा त्वं सर्वकालमभिष्टु-

तोऽपि, सर्वथा अयं भागधेयविपर्ययः । अथच तव सदा अहं प्रणता येन ईदृशः उपकारस्त्वत् सम्भाव्यते, त्वदीयपुष्पैर्निरीक्षिता देहं विसृजेयम् । कीदृशम् । अपदेऽकाण्ड एव ईहा दूतीविसर्जनतत्प्रतिपालनमुधाविनोदनप्रभृतयो यस्य तम् । अहं तावत् तादृगुपकारिभवदीयकुसुमावलोकनेऽपि असमर्था, तानि तु यदि महापुरुषतया एवंविधामवस्थां प्राप्तां मामवलोकयेयुः, तत् चिरवाञ्छितजीवितत्यागमनोरथेन अपि झगिति युज्येयम् । अतस्तव सदा नता अस्मि । नच एवं सम्भावनीयम्—अहितो हृदयदाहकारी कथं प्रणम्यते इति यतः किं त्वं हृदयं सदाहं करोषि, काका न एवमित्यर्थः । निजेन एव विरहहुतवहेन मम दह्यते हृदयं, तदिदानीं दाहकेन अपि दग्धस्य किं दह्यते इति सम्बन्धः । यदि तु अहंशब्दपौनरुक्त्यं सहृदयाः क्षमन्ते तदा एवं व्याख्या आपदे—विषमविपद्दहनार्थमेव केवलं यो मम देहस्तं त्यजेयमिति । तथा नीप तरुवर तव नता अस्मि । एवमुक्त्वा दुःसहतया द्वितीयवाक्यमाह—दाहयुक्तं मम हृदयं प्रकरोषि, पुनरपि विलापवशात् विचिन्त्य ब्रूते—किं यथा अद्य, तथा सर्वकालं त्वत्पुष्पेक्षिता अहमकाण्ड एव देहं त्यजेयं, काका नैवेत्यर्थः ॥ १३ ॥

कुसुमैरुपशोभितां सितै-
र्घनमुक्ताम्बुलवप्रहासितैः ।

मधुनः समवेक्ष्य कालतां
भ्रमरश्चुम्बति यूथिकालताम् ॥ १४ ॥

अयं भ्रमरो भ्रमणशीलो यूथिकां चुम्बति, मदीयप्रियतमस्तु पथिक एकत्र एव क्वचित् स्थितो मम नाम अपि न अवेत्तते इति । तां कीदृशीं यूथिकाम । सितैर्बद्धैर्न तावत् विकसितैः, ततोऽनन्तरं तु घनैर्मुक्तास्त्यक्ता येऽम्बुलवास्तैः करणभूतैः प्रहासितैः कुसुमैरुपलक्षिताम् । अथच घना मुक्ताफलसदृशा ये जलकणाः, तत्कृतानि यानि प्रहासितानि प्रहासितत्वोत्पादितानि निजच्छायास्फुरणानि यैः पीतानि अपि सन्ति शुक्लानि जातानि कुसुमानि । किं कृत्वा । मधुनो मकरन्दस्य कालतामत्यन्तपरिपाकरसोत्पन्नां विलोक्य; अथच यो नायकश्चिरात् कान्तामुपभुङ्क्ते, सोऽपि मधुनः पानगोष्ठ्याः कालतामवसरप्राप्तिमवलोक्य परिचुम्बति । काल इति मत्वर्थीयाकारान्तोऽपि, तथा सा अपि कान्ता धम्मिल्लपुष्पैर्घनैर्मुक्ताफलैर्विरहस्मरणानन्दादिकोत्पन्नैश्च अम्बुलवैर्वाष्पैर्हर्षचाटूवादिजैः प्रहसितैः सितैर्बद्धैर्व्यामिश्ररूपतया स्थितैः परस्परसंश्लिष्टैरुपलक्षिता भवति किलकिञ्चितचेष्टालङ्कारयोगिनी भवति विशेषतः पानगोष्ठ्यवसरे । यदुक्तं

'शुष्कं मुहुः प्ररुदितं क्षणमश्रुपातः
क्रोधो मुहुर्हसितमाशु..... ।'

इत्यादि । अत ईदृशी कदा अहं प्रियेण परिचुम्ब्यमाना भूयासमित्यर्थः ॥ १४ ॥

निचितं खमुपेत्य नीरदैः
प्रियहीनहृदयावनीरदैः ।

सलिलैर्विहतं रजः क्षितौ
रविचन्द्रावपि नोपलक्षितौ ॥ १५ ॥

इदं नायकविसृष्टायाः प्रतिदूत्या वचनम् । मा त्वमधृतिं कार्षीः, मार्गवैषम्यादेव असावियन्तं कालं न आगतः । तथाहि नीरदैर्मेघैरुपेत्य सर्वतोदिक्कं सङ्कट्य खं गगनं निचितम् । कीदृशैः । प्रियैः प्रियाभिश्च ये विहीना वियुक्तास्तेषां हृदयावनीं मनोभूमिं रदन्ति विलिखन्ति । एवं तावत् सर्वतोदिक्कं दुष्प्रेक्षं क्षितौ भूमौ रजः सलिलैर्विहतम् । आस्तां तावदन्यत् सलिलेन अभिभूयते रजोमात्रमपि न अवशिष्टमित्यर्थः ॥ १५ ॥

हंसा नदन्मेघभयाद्द्रवन्ति
निशामुखान्यद्य न चन्द्रवन्ति ।
नवाम्बुमत्ताः शिखिनो नदन्ति
मेघागमे कुन्दसमानदन्ति ॥ १६ ॥

हे कुन्दकुसुमसदृशदशने ! परिवर्जिततताम्बूलादिसम्भोगे ! प्रतिदूत्याश्चैव इयं नायिकां प्रति उक्तिः —एवं नाम मेघाः शब्दायन्ते यत् हंसा अपि पलायन्ते, रात्रावपि न सञ्चरणं युज्यते यतश्चन्द्रयुक्तानि तन्मुखानि न भवन्ति, एते च शिखिनो मयूरा उद्गतप्रहर्षवशात् शब्दायन्ते । एतेन तत् प्रत्युक्तं यत्तु नायिकया पूर्वमुक्तं

'हंसपंक्तिरपि नाथ सम्प्रति ।' (४)

इत्यादिना मार्गसौकुमार्यं, तदेव हि प्रत्युत रणरणकप्रदीपकं मार्गसङ्कटतां करोतीत्यर्थः ॥ १६ ॥

मेघावृतं निशि न भाति नभो वितारं
निद्राभ्युपैति च हरिं शुभसेवितारम् ।

सेन्द्रायुधश्च जलदोऽद्य रसन्निभानां
संरम्भमावहति भूधरसन्निभानाम् ॥ १७॥

रात्रिसमयेऽपि गमनागमने न युज्येते, यतो रात्रिसमये वितारं विगततारापटलं नभो न भाति यतो मेघावृतम् । यच्च तया उक्तं 'पथिकपांसुलोऽसौ मामुपेक्षते' इति, तदपि न युक्तं; शुभसेवितारमकलुषचरितमपि भगवन्तं हरिं निद्रा अभ्युपैति अशक्नुवती विरहं सोढुं नायकमभिसरति प्रत्युतेत्यर्थः । इन्द्रायुधयुक्तजलदो रसन् शब्दायमान इभानां करिणां पर्वतसदृशानां संरम्भं संरब्धतामावहति समन्तात् दर्शयति । यः किल अतिसुकुमारतया सुप्रसिद्धो जलदः, सोऽपि अन्यानुल्लङ्घनीयेन शक्रायुधेन वज्रेण सातिशयभीषणः सम्पन्नः सादिना हतानां करिणां सादृश्यमुद्वहतीत्यर्थः । अथवा मेघः शब्दायमान इभानां करिणां पर्वतसदृशानां संरम्भं जनयति प्रतिगर्जनशङ्कयेति तेऽपि क्षुभिताः सम्पन्ना इति सर्वथा सुसङ्कटाः पन्थानः ॥१७॥

सतडिज्जलदार्पितं नगेषु
नदद्भ्भोधरभीतपन्नगेषु ।
परिधीररवं जलं दरीषु
प्रपतत्यद्भुतरूपसुन्दरीषु ॥ १८ ॥

प्रतिदूत्या एव इयमुक्तिर्नायिका यदा एवमाह ननु अहमेव तत्र यास्यामीति, तदा तां प्रति । दरीषु गुहासु अपि अन्तःस्थिता या अद्भुतरूपसुन्दर्यस्तासु अपि उपरि जलं पततीति व्यधिकरणसप्तम्यौ । कीदृक् जलम् । सह विद्युद्भिर्जलं ददति ये, तैर्मेघैरर्पितं, न ते जलमात्रं ददति,

यावत् विद्युतोऽपि अतिभीषणा अर्पयन्तीति । क । नगेषु गिरिषु गर्जन्मेघत्रस्तसर्पेषु । अपरस्य ये त्रासदायिनस्तेऽपि यतो जलधररसितात् त्रस्यन्ति, तत्र का वार्ता भवादृशीनां मालतीकुसुमसुकुमारमनसामिति तात्पर्यार्थः । अन्यच्च किं भूतं जलम् । दरीषु अन्तः परितः समन्तात् धीरो गम्भीरो रवो यस्य, कन्दरासु अन्तः प्रतिशब्देन द्विगुणीभूत इत्यर्थः । तेन एषा अपि आशा न अस्ति– तोयदजलपटलं गगनात् निपतत् क्वचन गुहामुखेऽतिवाह्य पुनरपि गमिष्याम इति ॥ १८ ॥

क्षिप्रं प्रसादयति सम्प्रति कोऽपि तानि
कान्तामुखानि रतिविग्रहकोपितानि ।
उत्कण्ठयन्ति पथिकान् जलदाः स्वनन्तः
शोको विवर्धति च तद्वनितास्वनन्तः ॥१९॥

एवमेताभिरुक्तिभिः प्रियतमागमनं दुर्घटमिति अवगते आस्थाबन्धो नायिकाया विजाघटीतीत्यभिप्रायेण सा एव पुनराश्वाससम्पादनाय अस्य माध्यस्थ्ये विशेषानुद्देशात् तदीयहृदयशोकशिखिशमनशक्तामुक्तिमभिधत्ते– कोऽपि अनिर्वर्णनीयपुण्यसम्भारवृंहितः सम्प्रति जलदसमये तानि कान्तामुखानि निरतिशयसौन्दर्यवन्ति रतिविग्रहेण प्रणयकुपितेन सञ्जातरोषाणि तथा यानि तदीयवियोगजनितपाण्डिम्ना अद्य असाधारणधर्मसुन्दराणि क्षिप्रमनायासेन एव प्रसादयति त्वामवश्यं प्रसादयतीति यावत् । ननु न अद्यापि असावागतस्तत् कथमेतत् । आह शब्दायमाना हि जलधराः पथिकान् रणरणकवतः कुर्वन्ति निश्चितं दिनाद्दिनमुपचीयमान-

जलधरध्वानाकर्णनेन परिवर्धितोत्कण्ठः प्रियतमस्तावदागच्छतीति यावत् । ननु प्रियतमाः कथं शीघ्रं प्रसीदेयुः । आह तद्धनितासु पथिकदयितासु तथा शोको विवर्धति विवृद्धवदाचरति यथा अनन्तः संपद्यते । चकारेण एवं ध्वन्यते तदेव रसितं तासां शोकविवृद्धौ कारणमिति ॥ १६ ॥

अत्र केचिदिति पठन्ति

तासामृतुः सफल एव हि या दिनेषु
सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु ।
रत्युत्सवं प्रियतमैः सह मानयन्ति
मेघागमं प्रियसखि श्वसमानयन्ति ॥ २०॥

अयं श्लोकोऽत्रत्य इव न लक्ष्यते, पुस्तकेषु केन कारणेन गत इति न विद्मः । तथाहि पूर्वश्लोकौचित्यं तावदर्थेन न भजते तासामेव सफल ऋतुर्वर्षाख्यो याति या सेन्द्रायुधैरम्बुदैर्दुर्दिनेषु प्रियतमैः सह रत्युत्सवं मानयन्ति । अन्यथा किल हे प्रियसखि ! मेघागमं श्वसमाः सारमेयप्राया अपि नयन्ति,–इति व्याख्यायां प्राक्तने नवे ? यमकमेव दुर्लभम् । दिनदुर्दिनशब्दाभ्यामर्थपौनरुक्त्यमपि दुर्धरम् । यान् अस्तं गच्छन्निनो मार्तण्डो येषु दुर्दिनेषु,–इत्यपि व्याख्याने तासामिति अपेक्षितो यदर्थो दुरुपपादः । तासामिति तु अनपेक्षितयदर्थे पदव्यङ्ग्ये ध्वनौ व्याख्यायमाने उत्तरवाक्यं खण्डं गच्छेत् चर मारेचा न्यथेति ? मध्ये शास्त्रन्यायोचितः काव्यामृतकालुष्यैककारणमध्येतारः कवयः श्वसमा मेघागमं नयन्तीति परमनौचित्यम् । नच एवंविधेन अनौचित्येन कुलकपरिसमाप्तिः क्रियमाणा स-

हृदयचेतःसु रोमन्थादते किञ्चित् विदध्यात् । श्वसितीति श्वासस्तद्वदाचरतीति क्विप् ततोऽपि ताच्छील्यादिविवक्षायां चानश् । ततः प्रियसखीशब्देन सम्बन्धः प्रागेव वा तथापि न किञ्चिदर्थस्य पौष्कल्यम्, कष्टकल्पनायासं सत् । क । प्रियसखिष्विति सप्तम्या समास इति बहुवचनान्तेऽपि न कश्चित् कृतः सम्बन्धः । अन्यथापाठकरणमपि क्लेशमात्रफलमेव । किञ्च अत्र कर्ता महाकविः कालिदास इति अनुश्रुतमस्माभिः । नच अस्य काव्ये तृणमात्रमपि कलङ्कपात्रमुत्प्रेक्षितवन्तो मनोरथेऽपि सुप्तेऽपि सहृदयाः । तस्मात् प्राक्तन एव परिसमाप्तिश्लोकः । साच सख्या प्रतिदूतीभूतया नायिकाया आस्थाबन्धदार्ढ्योत्पादना युज्यते । उत्पन्नसमाश्वासा हि हृदयं स्थापयन्ती विप्रलम्भयितुं शक्या स्यात्

'आस्थाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।' (मे० दू०१०)

इतिदृष्ट्या । तेन अस्य परिसमाप्तिधुरोद्वहस्य अपि धुरन्धरत्वमविकलमेवेति । तदिदं युक्तमयुक्तं वेति स्वयमेव विदाङ्कुरुत सहृदयाः ॥ २० ॥

भावानुरक्तललनासुरतैः शपेय-
मालभ्य चाम्बु तृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण
तस्मै वहेयमुदकं घटकर्परेण ॥२१॥

कविना औद्धत्यप्रकटनाय सहृदयजनमानसनञ्जराय प्र-

तिज्ञा इयमुपनिबध्यते । सञ्जातपिपासः करकोशेन हस्त-सम्पुटेन पेयं पानार्हं तावदवसरप्राप्तमपि जलमत्यन्ताभि-लाषौत्सुक्ये पातुमद्रोहयोग्यमपि प्रत्युत आलभ्य द्रुग्ध्वा सहजप्रेमप्रणयिनीसम्भोगरसैश्च शपेयम् । अत्र शरीरस्पर्श-नाख्यस्य उपालम्भस्य न अतीव स्पष्टतेति 'शप उपालम्भने' (वा० ६११) इति आत्मनेपदाभावः । येन परेण कविना यमकैर्जीयेय, तस्मै घटकर्परेण जलं वहेयम् । कर्परशब्देन सातिशयक्लेशसमुद्वहत्वमात्मनि उच्यते । अत्र च यमकानां विप्रलम्भशृङ्गाररसातिशयविघ्नभूतानामपि मया तथा अपृथग्यत्ननिर्वर्त्यतया निबन्धः कृतः, येन प्रत्युत रस-परिपोषकविशिष्टव्याख्याभिधायिपदपरम्परालाभो यमकैः सम्पन्नः । तदुक्तं

'रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥' (ध्व० २।१७)

इति । एतया च प्रतिज्ञया एतत् परिहृतं

'ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धने ।
शक्तावपि प्रमादित्वं विप्रलंभे विशेषतः ॥'

इति । नहि इयं राजाज्ञा, अपितु रसबन्धविघ्नकारित्वप्रमादः परिहार्यः । अत्र च प्रत्युत आत्मपरिपोषकत्वमेव उक्तेन प्रकारेण यमकानामिति । कवीनां शक्तिरेव बलीयसी, सा एव लोकोत्तरा व्युत्पत्तिरिति अभिधीयते; नतु अन्या क-विशक्तेर्व्युत्पत्तिर्नाम काचित् । यदुक्तं मया एव रौरवे विचारे

'न वै दोषा दोषा नच खलु गुणा एवच गुणा
निबन्धस्वातन्त्र्यं सपदि गुणदोषान् विभजते ।

इयं सा वैदग्धी प्रकृतिमधुरा तस्य सुकवे-
र्यदत्रोत्पुदादप्यतिसुभगभावः परिणतः ॥'

इति शिवम् ॥ २१ ॥

प्रमाणपदमीमांसागगनं वै विराजते ।
समुच्छलति यत्स्पृष्टः साहित्यामृतसागरः ॥१॥
कवीन्दोरिन्दुराजस्य ते मच्चित्तविकासकाः ।
बोधांशवो विगाहन्तां भूर्भुवःस्वस्त्रयीमपि ॥२॥
तत्परामर्शधवलमनःकोकनदो मनाक् ।
काव्येऽभिनवगुप्ताख्यो विवृतिं समरीरचत् ॥३॥

समाप्ता इयं घटकर्परकुलकविवृतिः ।
कृतिर्महामाहेश्वरराजानकश्रीमदभिनवगुप्तपादानाम् ॥